"मनःशिला मनोगुप्ता मनोज्ञा नागजिह्विका।
नेपाली कुनटी गोला शिला दिव्यौषधिः
स्मृता ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

मन्तव्यं, त्रि, (मन्यते इति। मन+तव्य।) मननीयम्। भाव्यम्। यथा। "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।" इत्यादि छान्दोग्योपनिषत् ॥

मन्ता, [ऋ] त्रि, (मन्यते जानातीति। मन्+ "बहुलमन्यत्रापि।" उणा० २।९५। इति तृच्।) विद्वान्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (मननकर्त्ता। यथा। "स हि हेतुः कारणं निमित्तमक्षरं कर्त्ता मन्ता वेदिता बोद्धा द्रष्टा धाता ब्रह्मा विश्वकर्म्मा विश्वरूपः पुरुषः प्रभवोऽव्ययो नित्यः गुणी ग्रहणं प्राधान्यमव्यक्तं जीवो ज्ञः प्रकुलश्चेतनावान् विभुर्भूतात्मा चेन्द्रियात्मा चान्तरात्मा चेति।" इति चरके शारीरस्थाने चतुर्थेऽध्याये ॥)

मन्तुः, पुं, (मन्यते इति। मन्+"कमिमनिजनिगाभायाहिभ्यश्च।" उणा०।१।७३। इति तुन्।) अपराधः। (यथा, नैषधचरिते।९।११०।

"श्वतीव्रतेस्तीव्रमिमन्तु मन्तु-
मन्तर्वैरं वज्रिणि मार्ज्जितास्मि ॥")

मनुष्यः। प्रजापतिः। इति मेदिनी। ते, ४३ ॥ द्वात्रिंशदपराधा यथा। भगवद्भक्तानां चत्त्रियसिद्धान्नभोजनम् १ अनिषिद्धदिने दन्तधावनमकृत्वा विष्णोरुपसर्पणम् २ मैथुनं कृत्वा अस्नात्वा विष्णोरुपसर्पणम् ३ मृतं नरं स्पृष्ट्वा अस्नात्वा विष्णुकर्म्मकरणम् ४ रजस्वलां स्पृष्ट्वा अस्नात्वा विष्णुगृहप्रवेशनम् ५ मानवं शवं स्पृष्ट्वा अस्नात्वा विष्णुसन्निधाववस्थानम् ६ विष्णुं स्पृशतः पायुवायुप्रयोगः ७ विष्णोः कर्म्म कुर्व्वतः पुरीषत्यागः ८ विष्णुशास्त्रमनादृत्य शास्त्रान्तरप्रशंसा ९ अतिमलिनं वासः परिधाय विष्णुकर्म्माचरणम् १० अविधानेनाचम्य विष्णोरुपस्पर्शनम् ११ विष्णोरपराधं कृत्वा विष्णोरुपसर्पणम् १२ क्रुद्धस्य विष्णुस्पर्शनम् १३ निषिद्धपुष्पेण विष्णोरर्च्चनम् १४ रक्तं वासः परिधाय विष्णोरुपसर्पणम् १५ अन्धकारे दीपेन विना विष्णोः स्पर्शनम् १६ कृष्णं वस्त्रं परिधाय विष्णोः कर्म्माचरणम् १७ वायसोद्धृतवस्त्रं परिधाय विष्णोः कर्म्माचरणम् १८ विष्णवे कुक्कुरोच्छिष्टदानम् १९ वराहमांसं भुक्त्वा विष्णोरुपसर्पणम् २० जालपादशरारिमांसं भुक्त्वा विष्णोरुपसर्पणम् २१ दीपं स्पृष्ट्वा हस्तमप्रक्षाल्य विष्णोः स्पर्शनं कर्म्माचरणं वा २२ श्मशानं गत्वा अस्नात्वा विष्णोरुपसर्पणम् २३ पिण्याकं भुक्त्वा विष्णोरुपसर्पणम् २४ विष्णवे वराहमांसनिवेदनम् २५ मद्यमादाय स्पृष्ट्वा पीत्वा वा विष्णुगृहप्रवेशनम् २६ परकीयेणाशुचिना वा वस्त्रेण परिहितेन विष्णुकर्म्माचरणम् २७ विष्णवे नवान्नमप्रदाय तद्भोजनम् २८ गन्धपुष्पे अप्रदाय धूपदीपदानम् २९ उपानद्भ्यावारुह्य विष्णुस्थानप्रवेशनम् ३० भेरीशब्देन विना विष्णोः प्रबोधनम् ३१ अजीर्णे सति विष्णोरुपसर्पणम् ३२। एतदप्युपलक्षणं तथा च नरसिंहपुराणे।

"अपराधसहस्राणि अपराधशतानि च।
पद्मेनैकेन देवेशः क्षमते हेलयार्च्चितः ॥"

इत्याह्निकाचारतत्त्वे चतुर्थयामार्द्धकृत्यम् ॥ अपि च।

वराह उवाच।

"भुक्त्वा तु परकीयान्नं तत्परश्चनिवर्त्तनः।
प्रथमश्चापराधोऽयं धर्म्मविनाशाय वै भवेत् ॥
अभुक्त्वा दन्तकाष्ठानि यस्तु मामुपसर्पति।
द्वितीयश्चापराधस्तु कर्म्मविनाशाय विद्यते ॥
गत्वा मैथुनसंयोगे योऽनु मां स्पृशते नरः।
तृतीयमपराधन्तु कल्पयामि वसुन्धरे ! ॥
स्पृष्ट्वा रजस्वलां नारीमस्नाकं यः प्रपद्यते।
चतुर्थमपराधन्तु इष्टे नैव क्षमाम्यहम् ॥
स्पृष्ट्वा तु मृतकश्चैव असंस्कारकृतन्तु वै।
पञ्चमश्चापराधश्च न क्षमामि वसुन्धरे ! ॥
स्पृष्ट्वा तु मृतकं यस्तु नाचम्य स्पृशते तु माम्।
षष्ठकश्चापराधन्तु न क्षमामि वसुन्धरे ! ॥
मामेवार्च्चनकाले तु पुरीषं यस्य गच्छति।
सप्तमश्चापराधन्तु कल्पयामि वसुन्धरे ! ॥
यस्तु नीलेन वस्त्रेण प्रावृतो मां प्रपद्यते।
अष्टमश्चापराधन्तु कल्पयामि वसुन्धरे ! ॥
मामेवार्च्चनकाले तु यश्चासत्यं प्रभाषते।
नवमश्चापराधन्तु न रोचामि वसुन्धरे ! ॥
अविधानेन मां स्पृष्ट्वा यस्तु मां प्रतिपद्यते।
दशमश्चापराधन्तु मम चाप्रियकारकम् ॥
क्रुद्धश्चान्यानि कर्म्माणि कुरुते कर्म्मकारकः।
एकादशापराधन्तु कल्पयामि वसुन्धरे ! ॥
अकर्म्मण्यानि पुष्पाणि यस्तु मामुपकल्पयेत्।
द्वादशश्चापराधन्तु कल्पयामि वसुन्धरे ! ॥
यस्तु रक्तेन वस्त्रेण कौसुम्भेनोपगच्छति।
त्रयोदशापराधन्तु कल्पयामि वसुन्धरे ! ॥
अन्तकालेऽपि मां देवि ! यः स्पृशेत कदाचन।
चतुर्द्दशापराधन्तु कल्पयामि वसुन्धरे ! ॥
यस्तु कृष्णेन वस्त्रेण मम कर्म्माणि कारयेत्।
पञ्चदशापराधन्तु कल्पयामि वरानने ! ॥
अधौतेन च वस्त्रेण यस्तु मामुपकल्पते।
षोड़शन्त्वपराधानां कल्पयामि वरानने ! ॥
स्वयमन्नन्तु यो दद्यादन्नानाय च माधवि !।
सप्तदशापराधन्तु कल्पयामि वसुन्धरे ! ॥
यस्तु मत्स्यानि मांसानि भक्षयित्वा वरानने !।
अष्टादशापराधानि अनुजातानि माधवि ! ॥
जालपादं भक्षयित्वा यस्तु मामुपसर्पति।
एकोनविंशापराधं प्रतिजानामि सुन्दरि ! ॥
यस्तु मे दीपकं स्पृष्ट्वा यो मां स्पृशति माधवि !।
विंशकश्चापराधानां कल्पयामि वरानने ॥
श्मशानं यस्तु वै गत्वा यो मामेवाभिगच्छति।
एकविंशापराधानि कल्पयामि वसुन्धरे ! ॥
पिण्याकं भक्षयित्वा तु यो मामेवोपचक्रमे।
द्वाविंशत्यपराधानां तान्यहं चोपकल्पये ॥
यस्तु वाराहमांसानि प्रापणेनोपपादयेत्।
अपराधं त्रयोविंशं कल्पयामि वसुन्धरे ! ॥
सुरां पीत्वापि यो मर्त्यः कदाचिदुपसर्पति।
अपराधं चतुर्विंशं कल्पयामि वसुन्धरे ! ! ॥
यः कुसुम्भस्य मे शाकं भक्षयित्वोपचक्रमे।
अपराधं पञ्चविंशं कल्पयामि वसुन्धरे ! ॥
परप्रावरणेनैव यस्तु मामुपसर्पति।
अपराधेषु षड्विंशं कल्पयामि वरानने ! ॥
नवान्नं यस्तु भक्षेत न स देवान् पितॄन् यजेत् ॥
सप्तविंशापराधानि कल्पयामि गुणान्विते ! ॥
उपानहौ च प्रपदे तथा मे चोपचक्रमे।
अष्टाविंशापराधानि कल्पयामि गुणान्विते ! ॥
शरीरं मण्डयित्वा तु यो मामाप्नोति माधवि !।
एकोनत्रिंशमपराधं स स्वर्गेषु न गच्छति ॥
अजीर्णेन समाविष्टो यस्तु मामभिगच्छति।
त्रिंशकश्चापराधानां कल्पयामि वसुन्धरे ! ॥
गन्धपुष्पाण्यदत्त्वा तु यस्तु धूपं प्रयच्छति।
एकत्रिंशापराधन्तु कल्पयामि यशस्विनि ! ॥
विना भेर्य्यादिशब्देन द्वारस्योद्घाटनं मम।
महापराधं विद्यात तद्द्वात्रिंशापराधकम् ॥"

इति वाराहे द्वात्रिंशदपराधाध्यायः ॥

(त्रि, ज्ञाता। यथा, ऋग्वेदे।१०।६३।८।

"य ईशिरे भुवनस्य प्रचेतसो
विश्वस्य स्थातुर्जगतश्च मन्तवः।"

"मन्तवः सर्व्वस्य वेदितारः।" इति तद्भाष्ये सायनः ॥ मननीयः। यथा, ऋग्वेदे। १।१५२।१।

"युवोरच्छिद्रा मन्तवोह सर्गाः।"
"मन्तवोह मननीयाश्च।" इति सायनः ॥)

मन्त्रः, पुं, (मन्त्र्यते गुप्तं परिभाष्यते इति। मत्रि गुप्तभाषणे+घञ्। यद्वा, मन्त्रयते गुप्तं भाषते इति। मत्रि गुप्तभाषणे+अच्।) वेदभेदः। स च मन्त्रस्वरूपभागः॥ (यथा, ऋग्वेदे।६७।४।७४।

"प्रनूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थम् ॥"

यथा च मनुः।२।१६।

"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य
कस्यचित् ॥"

तस्मादुक्तमन्त्रभागश्च ।यथा, मनौ।७।२१७।

"सुपरीक्षितमन्नाद्यमद्यान्मन्त्रैर्विषापहैः ॥")

गुप्तिवादः। स तु रहसि कर्त्तव्यावधारणं मन्त्रणेति ख्यातम्। इत्यमरभरतौ ॥ परामर्शः। मन्त्रणा। (यथा, माघे।२।२९।

"मन्त्रो योध इवाधीरः सर्व्वाङ्गैः संवृतैरपि।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥")

व्यङ्गादिभ्यो मन्त्रग्रहणस्य निषेधो यथा,—

"व्यङ्गाङ्गहीना वधिराः कुयोनिषु रताश्च ये।
तेषां मन्त्रो न सुखदः प्रोक्तः कविभिरेव च ॥
कामुकानां जड़ानाञ्च स्त्रीजितानां तथैव च।
श्वशुरस्य गृहे नित्यं जामाता कर्म्मकारकः।